# परिशिष्टम् – १

## पदाभ्यासः ।

### नाम–तालिकां पूरयत ।

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| नीलकण्ठाय | | | चतुर्थी |
| | सरस्वत्योः | | षष्ठी |
| | | नक्षत्राणि | द्वितीया |

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| | वस्तुभ्याम् | | तृतीया |
| पितरि | | | सप्तमी |
| | | धेनुभ्यः | पञ्चमी |

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| | | चन्द्रमस्सु | सप्तमी |
| विद्युते | | | चतुर्थी |
| | पयसी | | प्रथमा |

### सर्वनामतालिकां पूरयत ।

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| तस्मात् | | | पञ्चमी |
| | | अस्माभिः | तृतीया |
| | कयोः | केषु | सप्तमी |

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| तव, ते | | | षष्ठी |
| | आभ्याम् | | चतुर्थी |
| | | भवतः | द्वितीया |

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| अस्याम् | | | सप्तमी |
| | | भवतीभ्यः | चतुर्थी |
| | इमे | इमानि | प्रथमा |

**लकार-तालिकां पूरयत ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| लट् | वन्दते | | | प्रथमपुरुषः |
| | | नृत्यावहे | | उत्तमपुरुषः |
| | | | कथयथः | मध्यमपुरुषः |

| | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| लङ् | | | अपठाम् | उत्तमपुरुषः |
| | | आस्ताम् | | प्रथमपुरुषः |
| | | | अलभध्वम् | मध्यमपुरुषः |

| | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| लोट् | करोतु | | | प्रथमपुरुषः |
| | | पूजयतम् | | मध्यमपुरुषः |
| | | | गच्छाम | उत्तमपुरुषः |

| | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| लिङ् | | रक्षेतम् | | मध्यमपुरुषः |
| | | | विद्येमहि | उत्तमपुरुषः |
| | भवेत् | | | प्रथमपुरुषः |

| | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| लृट् | क्षालयिष्यति | | | प्रथमपुरुषः |
| | | वर्धिष्येथे | | मध्यमपुरुषः |
| | | | कोपिष्यामः | उत्तमपुरुषः |

**खेलत-नन्दत !!**

## शब्दानुवादक्रीडा

क्रीडकानां गणद्वयं भवेत्। गणद्वयमपि अभिमुखम् उपविशति। क्रीडारम्भे एकस्मिन् गणे विद्यमानेषु एकः एकं मातृभाषाशब्दं वदति। तदा झटिति अन्यगणीयेषु यः कोऽपि तत्समानार्थकं संस्कृतशब्दं वदेत्। (सः शब्दः उचितः अस्ति उत न इति शिक्षकः परिशीलयेत्।) अधुना एतद्गणीयाः मातृभाषाशब्दं वदेयुः, तद्गणीयाः संस्कृतशब्दम्। एवमेव क्रीडा अनुवर्तते।

## परिशिष्टम् – २

### सन्धिकोषः ।

#### १. सुष्ठु गृहीतः चौरः ।

१. कोऽपि – कः + अपि ।
२. पूर्वमेव – पूर्वम् + एव ।
३. पुनरागन्तव्यम् – पुनः + आगन्तव्यम् ।
४. केनापि – केन + अपि ।
५. दृष्ट्वैव – दृष्ट्वा + एव ।

#### २.अव्ययमाला ।

१. वक्तुमास्यं – वक्तुम् + आस्यम् ।
२. दूरेऽपि – दूरे + अपि ।
३. केतकीगन्धमाघ्राय –
केतकीगन्धम् + आघ्राय ।
४. स्वयमायान्ति – स्वयम् + आयान्ति ।
५. लोकेभ्यो धेनवो – लोकेभ्यः +धेनवः ।
६. स्यामहं – स्याम् + अहम् ।
७. केशा नखा नराः – केशाः + नखाः + नराः ।

#### ३. किं मिथ्या ? किं वास्तवम् ?

१. सत्यमेव – सत्यम् + एव ।
२. तथापि – तथा + अपि ।
३. अत्याधिकोऽपयोगः –
अत्याधिकः + उपयोगः ।
४. इयमेवावश्यकता –
इयम् + एव + आवश्यकता ।
५. किमपि – किम् + अपि ।

#### ४. विध्यर्थमाला ।

१. त्यजेद्विद्यां – त्यजेत् + विद्याम् ।
२. त्यजेत्सुखम् – त्यजेत् + सुखम् ।
३. कुतो विद्या – कुतः + विद्या ।
४. कुतो विद्यार्थिनः – कुतः + विद्यार्थिनः ।
५. धनमलब्धं – धनम् + अलब्धम् ।
६. चानृतम् – च + अनृतम् ।
७. नरश्चरितमात्मनः –
नरः + चरितम् + आत्मनः ।
१०. किन्नु – किम् + नु ।
११. पशुभिस्तुल्यं – पशुभिः + तुल्यम् ।
१२. सत्पुरुषैरिति – सत्पुरुषैः + इति ।

#### ५. वीरवनिता विश्पला ।

१. तथैव – तथा + एव ।
२. यद्यपि – यदि + अपि ।
३. पादकर्तनानन्तरमपि –
पादकर्तनानन्तरम् + अपि ।

#### ६. पिनकोड–प्रवर्तकः महान् संस्कृतज्ञः ।

१. इतोऽपि – इतः + अपि ।
२. इत्येव – इति + एव ।
३. किञ्चिदपि – किञ्चित् + अपि ।
४. मासाधिकोऽपि – मासाधिकः + अपि ।
५. अधुनापि – अधुना + अपि ।
६. सङ्गीतमपि – सङ्गीतम् + अपि ।
७. तबलावादनेऽपि – तबलावादने + अपि ।
८. सर्वमेव – सर्वम् + एव ।

#### ७. सूक्तिसुधा ।

१. वसुधैव – वसुधा + एव ।
२. परोपकारार्थमिदम् –
परोपकारार्थम् + इदम् ।
३. पापमपाकरोति – पापम् + अपाकरोति ।
४. नार्यस्तु – नार्यः + तु ।
५. यत्रैतास्तु – यत्र + एताः + तु ।
६. सर्वास्तत्राफलाः –
सर्वाः + तत्र + अफलाः ।

#### ८. मनसः स्वच्छता ।

१. बाल्यादेव – बाल्यात् + एव ।
२. लघुभारमिव – लघुभारम् + इव ।
३. प्रतिदिनमिव – प्रतिदिनम् + इव ।
४. इत्यपि – इति + अपि ।

#### ९. अमरकोषः ।

१. कवेरमरसिंहस्य – कवेः + अमरसिंहस्य ।
२. कृतिरेषा – कृतिः + एषा ।
३. वयमपि – वयम् + अपि ।
४. तदपि – तत् + अपि ।
५. कर्तव्यमेव – कर्तव्यम् + एव ।

## १०. काव्यशास्त्रविनोदः ।

१. विपरीताश्चेद् – विपरीताः + चेत् ।
२. विपरीतोऽपि – विपरीतः + अपि ।
३. बिभ्रन्न – बिभ्रत् + न ।
४. ममाज्ञया – मम + आज्ञया ।
५. पितुराज्ञा – पितुः + आज्ञा ।
६. तस्यादिर्न – तस्य + आदिः + न ।
७. तस्यान्तः – तस्य + अन्तः ।
८. तवाप्यस्ति – तव + अपि + अस्ति ।
९. ममाप्यास्ति – मम + अपि + अस्ति ।
१०. गङ्गायाश्चञ्चलतरे – गङ्गायाः + चञ्चलतरे ।

## ११. मनोराज्यस्य फलम् ।

१. शास्त्रविमुखाश्च – शास्त्रविमुखाः + च ।
२. य इदम् – यः + इदम् ।
३. पराभवमाप्नोति – पराभवम् + आप्नोति ।
४. शक्रादपि – शक्रात् + अपि ।
५. स्वभावकृपणो नाम – स्वभावकृपणः + नाम ।
६. तस्याधस्तात् – तस्य + अधस्तात् ।
७. यत्परिपूर्णोऽयम् – यत् + परिपूर्णः + अयम् ।
८. घटस्तावत् – घटः + तावत् ।
९. ततस्तेन – ततः + तेन ।
१०. ततोऽजाभिः – ततः + अजाभिः ।
११. विक्रयणात्प्रभूतम् – विक्रयणात् + प्रभूतम् ।
१२. तस्याहम् – तस्य + अहम् ।
१३. सोमशर्मेति – सोमशर्मा + इति ।
१४. ततोऽहम् – ततः + अहम् ।
१५. चिन्तामसम्भाव्याम् – चिन्ताम् + असम्भाव्याम् ।
१६. साऽपि – सा + अपि ।

---

**घटकपरीक्षा प्रारूपम्** — **अङ्काः १०**

| | |
|---|---|
| **प्र. १. अ) १) चित्रं दृष्ट्वा नामानि लिखत (३ तः २)** | १ |
| **२) सङ्ख्याः अक्षरैः/अङ्कैः लिखत (३ तः २)** | १ |
| **आ) गद्यांशं पठित्वा कृतीः कुरुत।** | ४ |
| १) एकवाक्येन उत्तरत। | (१) |
| २) सत्यम् असत्यं वा/उचितं कारणं/ कः कं वदति ? | (१) |
| ३) गद्यांशात् समानार्थकं/विरुद्धार्थकं शब्दं चिनुत। | (१) |
| ४) द्वे त्वान्त/ल्यबन्त/तुमन्त-अव्ययपदे/विभक्त्यन्तपदे चिनुत। | (१) |
| **प्र. २. पद्यांशं पठित्वा कृतीः कुरुत।** | २ |
| १. पद्यांशः-१ कस्यापि एकस्य श्लोकस्य अनुवादं माध्यमभाषया लिखत।(२ तः १) | (२) |
| **प्र. ३. व्याकरणम्।** | २ |
| **पृथक्कुरुत। (६ तः ४)** (नाम-सर्वनाम-क्रियापदतालिका) | (२) |

* * *

**पठत बोधत –**

- चित्, चन युतानि विशेषणानि =

चित्, चन एतद् प्रत्ययद्वयम् अनिश्चिततां दर्शयति। 'किम्' इत्यनेन सह तयोः उपयोगः भवति।

(कः + चित्) कश्चित् नृपः, (किम् + चन) किञ्चन नगरम्।

(केन + चित्) केनचित् मुनिना। (कस्य + चित्) कस्यचित् मनुजस्य।

अस्ति **कश्चित्** नृपः। सः **कस्मिंश्चित्** नगरे अटति स्म। **केनचित्** मुनिना सः आहूतः। मुनिः अपृच्छत्, "किम् अन्विष्यसि महाराज?" नृपः **कश्चित्** कालं विचिन्त्य अवदत्, "न किमपि। मम कङ्कणं हस्तात् परिभ्रष्टम्। तद् एव अन्विष्यामि।" ऋषिः उक्तवान्, "हे राजन्, भवान् तु नृपः। अन्यत् किमपि कङ्कणं धारयितुं शक्नोषि। तथापि कङ्कणविषये किमर्थम् एतावत् चिन्तनम्? प्रत्युत भवतः राज्ये कियन्तः जनाः बुभुक्षिताः, **केचन** दरिद्राः, **केचित्** रोगपीडिताः च। **काश्चन** महिलाः उद्योगेन विना निराधाराः। **कैश्चिद्** बालकैः शिक्षणं त्यक्तम्। **केषाञ्चन** शिशूनाम् अन्नादिविषये महती दुरवस्था। **केषुचन** विभागेषु जलव्यवस्था न समीचीना। एतेषां कृते **किमपि** कुरु। कङ्कणविषये चिन्तां मा कुरु। राज्यस्य व्यवस्था नृपस्य परं कर्तव्यम्।"

**यदि -- तर्हि क्रीडा –** (गणकार्यं करणीयम्।)

एकेन गणेन 'यदि' उपयुज्य एकैकं वाक्यं लेखनीयम्। अन्येन गणेन 'तर्हि' इति पदं योजयित्वा एकैकं वाक्यं लेखनीयम्। 'यदि' चिटिकाः पृथक् स्थापयितव्याः। 'तर्हि' चिटिकाः पृथक् स्थापयितव्याः। शिक्षकेण काऽपि एका 'यदि' चिटिका पठितव्या। अनन्तरं 'तर्हि' चिटिका पठितव्या। यद् वाक्यं तस्मात् प्राप्यते तद् अर्थपूर्णं भवेत् वा न इति न द्रष्टव्यं केवलं हसितव्यम्।

यथा – यदि अहं भिषग्वरा भविष्यामि तर्हि पशवः नर्तिष्यन्ति।

☺ ☺ ☺